**Series RHB/1**

Code No. **52/1**
कोड नं.

Roll No.
रोल नं.

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| | | | | | | | |

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें।

- Please check that this question paper contains **16** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the serial number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the student will read the question paper only and will not write any answer on the answer book during this period.
- कृपया जांच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **16** हैं।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें।
- कृपया जांच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है। प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा। 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे।

# सङ्कलनात्मकं मूल्याङ्कनम्
# (SUMMATIVE ASSESSMENT)
# संस्कृतम् (सम्प्रेषणाधारितम्)
# द्वितीयसत्रम्
# COMMUNICATIVE SANSKRIT
# II SEMESTER

*अवधिः : होरात्रयम् ]* *[ पूर्णाङ्काः : 80*

*निर्धारित समय : 3 घण्टे ]* *[ अधिकतम अंक : 80*

*Time allowed : 3 hours ]* *[ Maximum marks : 80*

[P.T.O.

खण्डः क : अपठितांश-अवबोधनम् / अपठित-अवबोधन — 12 अंकाः

Section A : Unseen Reading Comprehension

खण्डः ख : रचनात्मकं कार्यम् / रचनात्मक-कार्य — 12 अंकाः

Section B : Writing Skills

खण्डः ग : अनुप्रयुक्तव्याकरणम् / अनुप्रयुक्त व्याकरण — 28 अंकाः

Section C : Applied Grammar

खण्डः घ : पठित-अवबोधनम् / पठित-अवबोधन — 28 अंकाः

Section D : Reading Comprehension

***निर्देश :***

***Instructions :***

*(i)* *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*
*इस प्रश्न-पत्र में चार खण्ड हैं।*
*This question paper has four sections.*

*(ii)* *प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*
*प्रत्येक खण्ड के उत्तर एक ही जगह पर क्रम से लिखने होंगे।*
*The answers to each section must be written at one place.*

*(iii)* *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*
*प्रश्न-पत्र पर उत्तर न लिखें।*
*Don't write answers in the question paper.*

*(iv)* *प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*
*प्रश्न-पत्र के अनुसार प्रश्न-संख्या अवश्य ही लिखनी होगी।*
*Write the question number according to the question paper.*

*(v)* *सर्वेषां प्रश्नानाम् उत्तराणि* ***संस्कृतेन*** *लेखनीयानि।*
*सभी प्रश्नों के उत्तर* ***संस्कृत*** *में लिखिए।*
*Answer all the questions in* ***Sanskrit****.*

## खण्डः 'क'
## (Section A)
## अपठित-अवबोधनम् (अपठित अवबोधन) 12 अङ्काः
## (Unseen Reading Comprehension)

1. अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नान् उत्तरत :

निम्नलिखित अनुच्छेद को पढ़कर दिए गए प्रश्नों के उत्तर दीजिए :

Read the following passage and answer the questions given below :

प्रातःकालः अतीव मधुरः कालः भवति। यदा स्वच्छे आकाशे सूर्यः उदेति अन्धकारः दूरे गच्छति। सर्वत्र प्रकाशः एव प्रकाशः भवति। पक्षिणः यत्र-तत्र न भ्रमन्ति। मधुरेण स्वरेण मधुरं गीतं गायन्ति। सरोवरेषु कमलानि उद्यानेषु च विभिन्नानि पुष्पाणि विकसन्ति। तेषु भ्रमराः सानन्दं विचरन्ति। शीतलः वायुः वहति। सम्पूर्णं वातावरणं सुगन्धमयम् अस्ति। भ्रमणशीलाः प्रसन्नाः जनाः उद्यानेषु भ्रमन्ति। केचन तत्रैव व्यायामं कुर्वन्ति। अनेके बालाः अपि उद्यानेषु यत्र-तत्र धावन्ति क्रीडन्ति च। ते अतीव प्रसन्नाः सन्ति। पशवः अपि प्रसन्नाः। वानराः वृक्षेषु कूर्दन्ति। कुक्कुराः क्रीडन्ति, हरिणाः धावन्ति, विडालाः च दुग्धं पिबन्ति। अधुना सर्वे जनाः स्वकार्येषु संलग्नाः भविष्यन्ति। एषा सुखदायिनी प्रभातवेला जनान् कर्त्तव्यस्य पाठं पाठयति। धन्या एषा प्रभातवेला।

**प्रश्नाः**

I उचितम् उत्तरं चित्वा लिखत।

उचित उत्तर चुनकर लिखिए।

Choose the correct answer and write the same. 1×2=2

(अ) यदा सूर्यः उदेति तदा दूरे किं गच्छति ?

(i) भ्रमराः

(ii) पक्षिणः

(iii) जनाः

(iv) अन्धकारः।

(ब) प्रभातवेला जनान् कस्य पाठं पाठयति ?

(i) कर्त्तव्यस्य

(ii) भ्रमणस्य

(iii) व्यायामस्य

(iv) धावनस्य।

II पूर्णवाक्येन उत्तरत।

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence. 2×2=4

(i) बालाः उद्यानेषु किं कुर्वन्ति ?

(ii) सरोवरेषु किं भवति ?

III प्रदत्तविकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।

दिए गए विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose the correct answer from the given options and write the same. 1×4=4

1. 'प्रभातवेला' इति पदस्य किं विशेषणपदम् अत्र प्रयुक्तम् ?
   - (i) स्फूर्तिदायिनी
   - (ii) सुखदायिनी
   - (iii) प्रसन्ना
   - (iv) मधुरः।

2. 'भविष्यन्ति' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?
   - (i) हरिणाः
   - (ii) बालाः
   - (iii) भ्रमराः
   - (iv) जनाः।

3. 'ते अतीव प्रसन्नाः सन्ति' इति वाक्ये 'ते' सर्वनामपदं केभ्यः प्रयुक्तम् ?
   - (i) बालेभ्यः
   - (ii) जनेभ्यः
   - (iii) खगेभ्यः
   - (iv) विडालेभ्यः।

4. 'सूर्यः' इति कर्तृपदस्य अत्र किं क्रियापदं प्रयुक्तम् ?
   - (i) गच्छति
   - (ii) दूरे
   - (iii) उदेति
   - (iv) अस्ति।

IV अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं चित्वा लिखत।

इस अनुच्छेद के लिए उपयुक्त शीर्षक चुनकर लिखिए।

Choose the appropriate title for this passage and write. 1×2=2

(i) सुगन्धः

(ii) सूर्योदयः

(iii) सरोवराणां शोभा

(iv) सुखदायिनी प्रभातवेला।

## खण्डः 'ख'

## (Section B)

## रचनात्मकं कार्यम् (रचनात्मक कार्य) 12 अङ्काः

## (Writing Skills)

2. पुत्रीं प्रति लिखितम् अधः पत्रं मञ्जूषायां प्रदत्तपदैः पूरयत :

पुत्री को लिखे गए निम्नलिखित पत्र को मंजूषा में दिए गए शब्दों से पूर्ण कीजिए :

The following letter is written to daughter. Complete it with the help of the words given in the box below : ½×8=4

.................... (i)

.................... (ii)

शुभाशंसाः।

मन्ये भवती तत्र .................... (iii)। अत्र गृहे सर्वे .................... (iv) सन्ति। अत्र सर्वे जनाः भवतीं सर्वदा स्नेहेन स्मरन्ति। भवत्याः स्वास्थ्यं कथम् अस्ति इति लिखतु। भवत्याः पठनं सम्यग् एव .................... (v) इति मन्ये। अर्धवार्षिकी .................... (vi) समाप्ता न वा ? अवकाशस्य आरम्भः कदा भविष्यति इति लिखतु। शीघ्रम् अत्र आगच्छतु। अन्यत् सर्वं कुशलम् अस्ति। भवत्याः .................... (vii) मम शुभाशिषः।

भवदीयः .................... (viii),

श्यामः।

**मञ्जूषा**

| |
|---|
| सखिभ्यः, प्रचलति, प्रियवत्से, कुशलिनः, रायपुरतः, पिता, परीक्षा, कुशलिनी। |

3. अधोदत्त-चित्रस्य वर्णनं मञ्जूषायां प्रदत्तपदानां सहायतया **चतुर्षु** संस्कृतवाक्येषु कुरुत :

नीचे दिए गए चित्र का वर्णन मंजूषा में दिए गए शब्दों की सहायता से **चार** संस्कृत वाक्यों में कीजिए :

Describe the following picture in **four** Sanskrit sentences with the help of the words given in the box below : 2×4=8



**मञ्जूषा**

| |
|---|
| उपवनम्, वृक्षाः, पादपाः, वानरः, पुष्पाणि, पक्षिणः, कन्दुकः, इदं, कन्दुकेन, त्रयः, उपरि, अस्ति, सन्ति, उपविशति, पश्यति, क्रीडन्ति, चित्रम्, प्रसन्नाः, खादति, आकाशे, कूजन्ति, विचरन्ति, फलम्, उपवनस्य। |

**अथवा OR**

**केवलं प्रज्ञाचक्षुर्भ्यः (केवल नेत्रहीनों के लिए)**

**(For Blinds only)**

मञ्जूषायां प्रदत्तपदानां साहाय्येन निम्नलिखितविषयम् आधृत्य **चतुर्षु** संस्कृतवाक्येषु एकम् अनुच्छेदं लिखत :

मंजूषा में दिए गए पदों की सहायता से निम्नलिखित विषय पर **चार** संस्कृत वाक्यों में एक अनुच्छेद लिखिए :

Write a paragraph in **four** Sanskrit sentences on the following topic with the help of the words given in the box below : 2×4=8

**मम विद्यालयः**

| |
|---|
| सुन्दरः, कक्षाः, विशालं, भवनम्, द्वारम्, क्रीडाङ्गणम्, सुसज्जिताः, छात्राः, पुस्तकालयः, भवन्ति, सन्ति, पठन्ति, पाठयन्ति, क्रीडन्ति, वृक्षाः, प्रधानाचार्यः, सांस्कृतिककार्यक्रमाः। |

## खण्डः 'ग'

## (Section C)

## अनुप्रयुक्त-व्याकरणम् (अनुप्रयुक्त व्याकरण) 28 अङ्काः

## (Applied Grammar)

4. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कृत्वा लिखत :

निम्नलिखित वाक्यों में रेखांकित पदों में संधि अथवा संधिच्छेद करके लिखिए :

Write the underlined words of the following sentences after joining or disjoining Sandhis : 1×4=4

(i) एषः गै + अकः कदा गास्यति ?

(ii) हे प्रभो ! मह्यं सत् + मतिं देहि।

(iii) नमः + ते महोदय !

(iv) यद्यपि सा विनीता बालिका तथापि यदा-कदा सा न शृणोति।

5. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत :

निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनकर लिखिए :

Choose and write the correct compounded or expounded form of the underlined words of the following sentences : 1×6=6

(क) मातापितरौ सदैव वन्द्यौ।

- (i) माता च पिता च
- (ii) मातरौ च पितरौ च
- (iii) मातृ च पिता च।

(ख) बालकः पाणी च पादौ च एतेषां समाहारः प्रक्षाल्य भोजनं खादति।

- (i) पाणिपादम्
- (ii) पाणिपादान्
- (iii) पाणिपादौ।

(ग) पीतदुग्धः (बालकः) प्रसन्नः अस्ति।

- (i) पीतं दुग्धम्
- (ii) पीतं दुग्धं यया सा
- (iii) पीतं दुग्धं येन सः।

(घ) बहुफलः (वृक्षः) अत्र शोभते।

(i) बहूनि फलानि

(ii) बहूनि फलानि यस्मिन् सः

(iii) बहूनां फलानां समाहारः।

(ङ) कार्यं समापयितुं सः शक्तिम् अनतिक्रम्य परिश्रमं करोति।

(i) यथाशक्तिः

(ii) यथाशक्ति

(iii) यथाशक्तिम्।

(च) वृक्षस्य समीपम् एका नदी वहति।

(i) उपवृक्षम्

(ii) उपवृक्षः

(iii) सवृक्षम्।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत :

निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति-प्रत्ययों को जोड़कर अथवा पृथक् करके उचित उत्तर विकल्पों में से चुनकर लिखिए :

Write the underlined words of the following sentences after joining or disjoining suffixes to the roots or words, selecting the correct answer from the options given below : ½×4=2

(क) क्रीड् + शतृ बालिकां कथय।

(i) क्रीडन्

(ii) क्रीडन्ती

(iii) क्रीडन्तीम्।

(ख) मुद् + शानच् बालकाय मोदकं यच्छ।

(i) मोदमानः

(ii) मोदमानाय

(iii) मोदमानायै।

(ग) प्रकृतेः रमणीय + तल् मनोरमा भवति।

(i) रमणीयः

(ii) रमणीयता

(iii) रमणीया।

(घ) मयूरस्य मनोहारिणी शोभा सर्वेभ्यः रोचते।

(i) मनोहारिन् + ङीप्

(ii) मनोहर + ङीप्

(iii) मनोहर + ई।

7. अधोलिखितवाक्ययोः कोष्ठकान्तर्गतयोः पदयोः प्रकृति-प्रत्ययौ योजयित्वा लिखत :

निम्नलिखित **दो** वाक्यों में कोष्ठक के अन्तर्गत दिए गए पदों के प्रकृति-प्रत्ययों को जोड़कर लिखिए :

Write the words of the following **two** sentences after joining suffixes to the roots or words given in the brackets : 1×2=2

(i) परिश्रमस्य (महत् + त्व) सर्वे जानन्ति।

(ii) सा स्वभावेन (सरल + टाप्) अस्ति।

8. अधोलिखितवाक्येषु रिक्तस्थानानि मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः पूरयित्वा लिखत :

निम्नलिखित वाक्यों में रिक्त स्थानों की पूर्ति मंजूषा में दिए गए उचित अव्ययों के द्वारा कीजिए :

Fill in the blanks in the following sentences with appropriate indeclinable words given in the box below : 1×6=6

(i) त्वं ........(i)........ गन्तुम् इच्छसि ?

(ii) तत्र ........(ii)........ गच्छ।

(iii) अहम् इदं कार्यं ........(iii)........ करिष्यामि।

(iv) सा कथयितुम् इच्छति ........(iv)........ सर्वे गृहं गच्छेयुः।

(v) "ते इदं कार्यं करिष्यन्ति।" ........(v)........ कनिष्कः कथयति।

(vi) सः ........(vi)........ रात्रौ आगच्छत्।

| |
|---|
| श्वः, इति, ह्यः कुत्र, मा, यत्। |

9. प्रदत्तविकल्पेभ्यः उचितसङ्ख्यापदं चित्वा वाक्यानि पूरयत।

दिए गए विकल्पों में से उचित संख्यापद चुनकर वाक्य पूर्ण कीजिए।

Choose the correct numerical words from the options given below and complete the sentences. 1×4=4

(i) ............ (2) जनौ अत्र आगमिष्यतः।

(क) द्वे (ख) द्वौ

(ग) द्वयोः (घ) द्वाभ्याम्।

(ii) वृक्षे ............ (4) फलानि सन्ति।

(क) चतस्रः (ख) चत्वारः

(ग) चत्वारि (घ) चतुर्णाम्।

(iii) उद्याने ............ (3) महिलाः भ्रमन्ति।

(क) तिस्रः (ख) त्रयः

(ग) त्रीणि (घ) त्रिभ्यः।

(iv) वृक्षे ............ (5) पक्षिणः कूजन्ति।

(क) पञ्चभिः (ख) पञ्चानाम्

(ग) पञ्चसु (घ) पञ्च।

10. अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। उचितम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा अशुद्धपदं संशोध्य लिखत :

नीचे लिखे गए वाक्यों में रेखांकित पद अशुद्ध है। दिए गए विकल्पों में से उचित उत्तर चुनकर अशुद्ध पद को संशोधित कर लिखिए :

Choose the correct answer from the given options and correct the underlined incorrect words in the following sentences : 1×4=4

(क) तौ तत्र किमर्थं गच्छन्ति ?

(i) गच्छति (ii) गच्छथः

(iii) गच्छतः (iv) गच्छसि।

(ख) ते बालिकाः कदा गमिष्यन्ति ?

(i) ताः (ii) सा

(iii) तौ (iv) सः।

(ग) आवां न चलथः।

(i) तौ (ii) युवाम्

(iii) यूयम् (iv) ताः।

(घ) जनाः नाटकं श्वः पश्यन्ति।

(i) पश्यन्तु (ii) पश्येयुः

(iii) अपश्यन् (iv) द्रक्ष्यन्ति।

## खण्डः 'घ'

## (Section D)

## पठित-अवबोधनम् (पठित-अवबोधन) **28 अङ्काः**

## (Reading Comprehension)

**11.** अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत :

निम्नलिखित गद्यांश, पद्यांश और नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर लिखिए :

Read the following prose, poetry and drama passages and answer the questions given below :

**(अ) गद्यांशः**

मम कलनस्य तु आधारः सूर्यः एव। सूर्यस्य द्वे गती उत्तरायणम् दक्षिणायनञ्च। प्रत्येकम् अयनस्य अवधिः षण्मासाः। भारतीयमासानां नामानि नक्षत्रनामभिः सम्बद्धानि। पूर्णिमायां यत् नक्षत्रं भवति तेनैव नाम्ना तस्य मासस्य नाम भवति। यथा चैत्रे मासे पूर्णिमा चित्रानक्षत्रयुता भवति, अतः तस्य मासस्य नाम 'चैत्रः' भवति।

I एकपदेन उत्तरत।

एक पद में उत्तर दीजिए।

Answer in one word. ½×2=1

(i) कालस्य कलनस्य आधारः कः ?

(ii) पूर्णिमा चित्रानक्षत्रयुता कस्मिन् मासे भवति ?

II पूर्णवाक्येन उत्तरत।

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence. 1×2=2

भारतीयमासानां नामानि कैः सम्बद्धानि ?

III विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।

विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose the correct answer from the given options and write the same. ½×2=1

(क) अत्र 'भवति' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

(i) सूर्यः

(ii) अवधिः

(iii) उत्तरायणम्

(iv) चैत्रः।

(ख) 'द्वे' इति सङ्ख्यावाचकं पदं कस्य विशेषणपदम् अत्र प्रयुक्तम् ?

(i) उत्तरायणस्य

(ii) सूर्यस्य

(iii) दक्षिणायनस्य

(iv) 'गती' इति पदस्य।

**(ब) पद्यांशः**

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।

तदेवाहुः महात्मानः समत्वमिति तथ्यतः ।।

I एकपदेन उत्तरत।

एक पद में उत्तर दीजिए।

Answer in one word. ½×2=1

(i) वाचि किं भवेत् ?

(ii) 'चित्ते वाचि च अवक्रता' इति के मन्यन्ते ?

II पूर्णवाक्येन उत्तरत।

पूर्ण वाक्य में उत्तर दीजिए।

Answer in a complete sentence. 1×2=2

'चित्ते वाचि च अवक्रता एव समत्वम्' इति के कथयन्ति ?

III विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।

विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose the correct answer from the given options and write the same. ½×2=1

(क) 'आहुः' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

(i) महात्मानः

(ii) अवक्रता

(iii) समत्वम्।

(ख) 'वाण्याम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(i) चित्ते

(ii) अवक्रता

(iii) वाचि।

**(स) नाट्यांशः**

**काकः** - (प्रविश्य, सक्रोधम्) आः किम् उक्तवती भवती ? यदि अहं कृष्णवर्णः तर्हि श्रीरामस्य वर्णः कीदृशः ? श्रीवासुदेवस्य वर्णः कीदृशः ? मुग्धे ! अहं तु अतीव कर्त्तव्यपरायणः। प्रभाते 'का-का' ध्वनिना सुप्तान् प्रबोधयामि कर्मसु च विनियोजयामि।

**राजहंसः** - हुं ! किमनेन ? एतत् कार्यं तु कुक्कुटोऽपि करोति।

**काकः** - (विहस्य) कुक्कुटः ! अरे अद्य कुतः कुक्कुटाः नगरेषु। अहमेव सर्वत्र सुलभः।

**राजहंसः** - भोः भो वाचाल ! स्वीयैः कटुभिः क्वणितैः जनजागरणात् अन्यत् तु किमपि न करोषि।

I एकपदेन उत्तरत।

एक पद में उत्तर दीजिए।

Answer in one word. ½×2=1

(i) काकस्य वर्णः कीदृशः ?

(ii) अद्य कुक्कुटाः कुत्र न दृश्यन्ते ?

II पूर्णवाक्येन उत्तरत।

पूर्ण वाक्य में उत्तर लिखिए।

Answer in a complete sentence. 1×2=2

काकः कैः सुप्तान् जनान् प्रभाते प्रबोधयति ?

III विकल्पेभ्यः उचितम् उत्तरं चित्वा लिखत।

विकल्पों में से उचित उत्तर चुनकर लिखिए।

Choose the correct answer from the options given below and write the same. ½×2=1

(i) 'अहमेव सर्वत्र सुलभः' इति वाक्ये 'अहम्' सर्वनाम पदं कस्मै प्रयुक्तम्?

(क) राजहंसाय

(ख) राजहंस्यै

(ग) काकाय

(घ) कुक्कुटाय।

(ii) 'करोति' इति क्रियापदस्य कर्तृपदं किम् प्रयुक्तम्?

(क) कुक्कुटः

(ख) काकः

(ग) अहम्

(घ) राजहंसी।

**12.** अधोलिखितयोः **कथनयोः** समुचितं भावं विकल्पेभ्यः चित्वा लिखत।

निम्नलिखित **दोनों** कथनों का समुचित भाव दिए गए विकल्पों में से चुनकर लिखिए।

Choose the correct gist of the following **two** sentences from the given options and write the same. 1×2=2

(क) अलं चिन्तया। आपदां तरणिः धैर्यम्।

**भावः**

(i) चिन्तायाः आवश्यकता न अस्ति। शनैः-शनैः चिन्ता दूरीभविष्यति।

(ii) चिन्तायाः आवश्यकता न अस्ति अपितु धैर्यस्य आवश्यकता अस्ति।

(iii) चिन्ता न करणीया। विपत्तिषु धैर्यस्य आवश्यकता अस्ति। धैर्यं नौका इव अस्ति।

(ख) वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
सः केनापि प्रकारेण परैर्न परिभूयते॥

(i) मन्त्री सदैव चतुरः एव भवति। तस्य कोऽपि अहितं न करोति।

(ii) मन्त्री सम्भाषणे कुशलः धैर्ययुक्तः च भवति। सः सभासु अपि भयम् न अनुभवति। तस्य सदा सम्मानम् अपि भवति।

(iii) यः मन्त्री वाक्चतुरः, धैर्ययुक्तः सभासु च साहसिकः भवति तस्य अन्यैः कदापि कुत्रापि च तिरस्कारः भवति।

**13.** मञ्जूषातः उचितम् पदं चित्वा अधोलिखितश्लोक **द्वयस्य** अन्वयं पूरयत :

मंजूषा में से उचित पद चुनकर निम्नलिखित **दोनों** श्लोकों के अन्वय को पूर्ण कीजिए :

Complete the prose-order of the following **two** shlokas by choosing appropriate words given in the box below : ½×8=4

(क) प्रार्थितं ते मया चक्रं देवदानवपूजितम्।
अजेयः स्यामिति विभो! सत्यमेतत् ब्रवीमि ते।।

**अन्वयः**

........(i)........ ! अजेयः स्याम् इति ........(ii)........ देवदानव-पूजितम् चक्रम् ते ........(iii)........ । एतत् ते सत्यम् ........(iv)........ ।

(ख) अधुना रमणीया हि, सृष्टिरेषा जगत्पतेः।
जीवाः सर्वेऽत्र मोदन्तां, भावयन्तः परस्परम्।।

**अन्वयः**

एषा ........(v)........ सृष्टिः हि अधुना ........(vi)........ । सर्वे जीवाः ........(vii)........ परस्परम् भावयन्तः ........(viii)........ ।

| |
|---|
| मोदन्ताम्, रमणीया, ब्रवीमि, विभो! |
| अत्र, प्रार्थितम्, मया, जगत्पतेः। |

**14.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत।

रेखांकित पदों के आधार पर प्रश्न निर्माण कीजिए।

Frame the questions on the basis of the underlined words. 1×4=4

(i) <u>अरुणस्य</u> प्रदेशः अरुणाचलः।

(ii) संवत्सरे <u>षड्</u> ऋतवः भवन्ति।

(iii) जनाः परस्परं मुखे कपोले च <u>शालिचूर्णं</u> लिम्पन्ति।

(iv) <u>पवनः</u> स्तब्धः जातः।

**15.** अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत :

निम्नलिखित वाक्यों को घटना के क्रमानुसार लिखिए :

Write the following sentences in their sequential order : ½×8=4

(i) एकस्य नाम दुष्टबुद्धिः आसीत् अपरस्य नाम प्रच्छन्नभाग्यः।

(ii) सर्पः दुष्टबुद्धिम् एव दष्टवान्।

(iii) दुष्टबुद्धिः इदं श्रुत्वा तस्य धनहरणार्थं मित्रस्य गृहं गच्छति।

(iv) एकदा द्वे मित्रे धनं चोरयितुं प्रस्थितौ।

(v) तत्र सः श्रृणोति यत् प्रच्छन्नभाग्यस्य क्षेत्रे अश्वत्थतरुमूले एकः सुवर्णकलशः अस्ति।

(vi) भार्यायाः परामर्शानुसारं सः परिश्रमेण धनार्जनं करोति।

(vii) दुष्टबुद्धिः अश्वत्थमूलं खनित्वा सर्पयुक्तं सुवर्णकलशं प्राप्नोति।

(viii) मार्गे बालानां वचनं श्रुत्वा प्रच्छन्नभाग्यः चौरकर्म त्यक्तुम् इच्छति।

**16.** रेखाङ्कितपदानां प्रसङ्गानुसारम् अर्थं चित्वा लिखत।

रेखांकित पदों के अर्थ प्रसंगानुसार चुनकर लिखिए।

Choose the correct contextual meaning of the underlined words and write the same. 1×2=2

(i) पुष्पाणां <u>समृद्धिः</u> सुगन्धिः च मनोहरः।

(क) ऐश्वर्यम् सुखं च

(ख) धनम्

(ग) बाहुल्यम्।

(ii) वत्स! न जानाति भवान् द्रौणेः चपलां <u>प्रकृतिम्</u>।

(क) स्वभावम्

(ख) मूलम्

(ग) मूलधातुं शब्दं वा।